**Der Brahmane und der Mungo**
**Hitopadeśa IV.13**

अस्त्युज्जयिन्यां माठरो नाम ब्राह्मणः। तस्य ब्राह्मणी बालापत्यस्य रक्षार्थं ब्राह्मणमवस्थाप्य स्नातुं गता। अथ ब्राह्मणस्य कृते राज्ञः श्राद्धं दातुमाह्वानमागतम्। तच्छ्रुत्वा ब्राह्मणः सहजदारिद्र्यादचिन्तयत्। यदि सत्वरं न गच्छामि तदान्यः कश्चिच्छ्राद्धं ग्रहीष्यति। उक्तं च।

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्॥

किं तु बालकस्यात्र रक्षको नास्ति। तत्किं करोमि। यातु। चिरकालपालितमिमं पुत्रनिर्विशेषं नकुलं बालकरक्षार्थमवस्थाप्य गच्छामि। तथा कृत्वा स तत्र गतः। ततस्तेन नकुलेन बालकसमीपमागच्छता कृष्णसर्पो दृष्टो व्यापादितश्च। अथासौ नकुलो ब्राह्मणमायान्तमवलोक्य रक्तविलिप्तमुखपादः सत्वरमुपागम्य तस्य चरणयोर्लुलोठ। ततोऽसौ ब्राह्मणस्तं तथाविधं दृष्ट्वा मम पुत्रोऽनेन भक्षित इत्यवधार्य व्यापादितवान्। अनन्तरं यावदसावुपसृत्य पश्यति ब्राह्मणस्तावद्बालकः सुस्थः सर्पश्च व्यापादितस्तिष्ठति। ततस्तमुपकारकमेव नकुलं निरूप्य विभावितकृत्यः संतप्तचेताः स परं विषादमगमत्। अतोऽहं ब्रवीमि।

योऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः।
स तथा तप्यते मूढो ब्राह्मणो नकुलाद्यथा॥